No. १५६५

Title कारकवादः कारकव्याख्याना

Author श्रीजयरामः

Extent १२ Age c १८४५

Subject न्याय वैशेषिकं

कारकवादः कारकव्याख्या

१५६७

१२५०

तदन्वितत्वं कर्तृत्वा मी दो = ४

ॐ नमः सरस्वत्यै ॐ नत्वा शम्भोः पदाम्भोजं न्यायतः समासतः करोतीति कारकव्याख्यामिदं सन्तोषवतां मुदे । १ का
रकाणि कर्तृकर्मकरणसंप्रदानापादानाधिकरणानि षट् कारकत्वं च क्रियानिमित्तत्वम् चैत्रस्तण्डुलं पचती
त्यादौ संबन्धिनि चैत्रादावतिव्याप्तेः अनुमतिप्रकाशनद्वारा संप्रदानादेरिव तण्डुलादिसंप्रदानद्वारा संबन्धिनो
विपाकादिक्रियानिमित्तत्वात् किं तु क्रियान्वितविभक्त्यर्थान्वितत्वम् अस्ति च कर्त्रादीनां क्रियान्वितत्तिङ् द्वि
द्विभक्त्यर्थान्वयः न तु दाहृते संबन्धिनि षष्ठ्यर्थसंबन्धस्य तण्डुलादिनामार्थान्वितत्वात् क्रियानन्वितत्वात् चै
त्रस्य पचतीत्यादावपि तण्डुलादिपदाध्याहारेणैव बोधः षष्ठ्यर्थसंबन्धस्य तण्डुलादिनामार्थेनैव क्रियायाः क
र्मत्वादिनैव साकांक्षत्वात् परस्पराकांक्षाविरहात् ओदनस्य भोक्ता चैत्रस्य पाक इत्यादौ कर्तृत्वकर्मत्वादिका सम्बन्धस्य क्रियायामन्वयाभावादेव ८
षष्ठी कारकविभक्तिरेव कर्तृकर्मणोः कृतीत्यनेन तद्विधानात् अत एव संबन्धस्य न कारकत्वं क्रियायो
गाभावादिति वैयाकरणाः अत एव शब्दविप्रतिपत्तिर्गतानां प्रतिकृतीनमिथस्यमेघजैरित्यादौ सालसीरूप
करूतेयथापरेषामित्यादौ रोगे विपत्तौ चेत्यादि पदाध्याहारेणैव बोधः यदि च विनाध्याहारं षष्ठ्यर्थसम्बन्ध अनेन सम्प्रदानानिमित्तत्वस्य कारकत्वाभावादेव १८
स्य क्रियायामन्वयः प्रामाणिकः तदा क्रियान्वितकर्तृत्वकर्मत्वादिषष्ठ्यर्थमात्रान्वयित्वं कारकत्वं बोध्यम् अत एव
च मतिहीविनतृतीस्तयोर्देवीरूजनम् केशेषु च मर्गीहेतिसीम्नि च फलको हत इत्यादौ निमित्तादेरपि न कारकत्व दै ५
म् एतादृशस्य उपपदविभक्त्योर्न तु कारकविभक्तयः गौरेधितापयः अजां ग्रामं नयतीत्यादौ ग्राममजाकर्मतत्त्वम
विलक्षणम् एवं हि दुहरूपविभागानुकूलक्रियानुकूलव्यापारविशेषः कर्तृनिष्ठो दुहेरर्थः वा दुहतं पर्णं दोग्धी
ति व्यापारकथनं स्वच्छं तिरूयम् सौम्यो गानं जलं रौध्या स्वतनाविस्थाविशेषेति विशेषैर्हि दुहविधान प्रयोगगम्यः
विशेष्यसङ्गृहीतात्प्रयोगस्य कृतेः र दुग्धवद्धस्तस्वेति न देयमिति वदन्ति संयोगानुकूलक्रियानुकूलव्यापारस्ता दृशोऽनीयातेरर्थः विभागेगामि
तस्य क्रियायां पयः स्यान्वयात् गोदृत्तिविभागानुकूलपयोहरित क्रियानुकूलव्यापाराद्नुकूलकृतिमानि

का॰क॰ १

तिवाक्यार्थः द्वितीयेन ग्राममिमस्य संयोगेऽजामिमस्य क्रियायामन्वयात् ग्रामवृत्तिसंयोगानुकूलाजावृत्तिक्रि
यानुकूलव्यापारः ग्रामवृत्तिसंयोगानुकूलपुत्रवृत्तिक्रियानुकूलव्यापारानुकूलकृतिमानिति वाक्यार्थः सा
ताद्वर्ण्येनावच्छेदकनिरूढक्रियारूपफलान्वयितो रज्जु प्रयोज्यकर्मत्वम् तादृशक्रियारूपफलान्विता
न्वयितो ग्रामयोगरूपत्वकर्मत्वम् उभयत्रापि धात्वर्थान्वितविभक्त्यर्थान्वितत्वमस्ति फलद्वयस्यापि धात्वर्थता
वच्छेदकत्वात् अत एव कर्मद्वयसाकांक्षफलबोधकधातुत्वं द्विकर्मकत्वं सम्प्रदायम् यत्तु विभागानुकूलक्रियाहेतु
र्थः संयोगानुकूलक्रियानयतेरर्थः न तत्र भयानुकूलकर्तृव्यापारः कर्मद्वयस्याप्येकत्वफलेऽन्वयस्तत्र प्रयो
ज्यकर्मत्वानुपपत्तेः परसमवेतत्वस्य क्रियायामभावात् कर्मद्वयस्याप्येकत्वफलेऽन्वय एव गोऽजामन्योऽन्यव्यवहारो
न स्यात् एतेन विभागाद्यनुकूलाकर्तृगतावैवदुहादेरर्थः स्यपास्तम् फलद्वयाप्रवेशे गोऽजामन्योऽन्यव्यवहारानुप
पत्तेः पयपिगामित्यस्य गोवृत्तित्वं पयस्येवान्वेतीति गोऽकर्मकत्वमिति तत्रापि न गोः पयोदुग्धेत्तरस्यादौ गोः कर्म
त्वस्यानुपपादत्वात् अजां ग्राममित्यादौ ग्रामवृत्तित्वस्य प्रागजायामसत्त्वेनान्वयायोगात् काशीतः प्रयागे नीयमा
नामजां काशीं नयतीति प्रयोगापत्तेश्च न च तत्र क्रियानुकूलकृतिमत्वं तत्र क्रियाकर्तृत्वम् काशीतो गावः
कृतव्यापारवत्वप्रतिसंधाने विकर्तृपरप्रयोगस्तु गोणः गहनरभारोऽनीलनादिना सिद्धयत्न शक्तिकेन धातुना
ननेनैव सिद्धस्य कर्तृपरस्य प्रयत्नाश्रयबोधकत्वात् क्रियाविषयकप्रयत्नसत्वेऽपि तत्क्रियायां निषेधो न तत्क्रियायां क
र्तृत्वाव्यवहारात् विषयत्वं विहायाऽनुकूलत्वमुपात्तं यदि च प्रयोभक्तेन त्वमयाकृतमिति प्रपदेशात् नौ नरी यक्ष कृति
साध्यत्वमपि च मध्यस्य शाकेन भोजनस्य न कर्तृत्वमतस्तद्विषयत्वमपि निवेश्यम् न च साध्यत्वेन नेनयामादि कृते
देश्यत्वेन स्वर्गादिविषयकत्वेऽपि न यागादिकर्तुः स्वर्गकर्तृत्वम् ग्रामादिकर्तृकयागादिकर्तृत्वमीश्वरस्ये मत
गाविवत्सायामीशः पचतीति प्रयोगोऽपीष्यते न चैतत् कार्यत्वानवच्छिन्नजन्यतानिरूपितत्वस्य साधारणत्वे निवेश्यमि
ति नैयायिकाः वैयाकरणास्तु नमिदितेकर्तरीत्यनुशासनात् अचेतनेऽपि कर्तृपरप्रयोगात् क्रियाश्रयत्वमेव कर्तृ

कर्तृपदप्रयोगात् कृताकृतविभागादिना सिद्धयत्नशक्तिकेन धातुना तज्जन्येन सिद्धस्य कर्तृपरस्य यत्नाश्रयबोधकत्वाच्च एतेनेपि

ग्रामपयसोर्गोग्रामयोश्च प्रयोगेऽपि ९=

योज्ययोः कर्मत्वानुपपत्तेः

नमतेर्गोरविषयोर्वृत्तिविभागानुकूलक्रियानुकूलकृतिमानिति बोधः = ९= २

लोकसंगीतिकृतादेः प्रयाने नी ...कर्मकाणां निर्वेशः १ ... क्रियानुकूल ... योनिवृत्तिक्रियानुकूलविभा ... योगोवृत्तिप्रयवबोधः १=

न तस्य तु कूलरभारो ... [illegible] ... उक्ताद्यम् = १

संयोगविभाग २=

फलद्वयक्रियासंयोगविभाग

क४

न तत्क्रियानुकूलतद्विषयकृतिमत्त्वं तत्क्रियाकर्तृत्वम् ४

[illegible]

भोजन ... [illegible] ... साध्यत्वे ... विषयता ... पार्थिवभोजनविषय ... विषयत्वे ... विषयता

नवुकत्याश्रयत्वम् २८ ओदनादौ २८

त्वम् कारककर्मादिपदस्य तत्तद्धात्वर्थक्रियार्थकपदाश्रयत्वमिहाख्यातार्थः तथा च यत्पदसमभिव्याहृताख्यातेन य-
द्धात्वर्थान्वितयद्धर्मवत्त्वं बोध्यते तद्धात्वर्थनिरूपिततद्धर्मवत्त्वं तद्धात्वर्थकर्तृत्वम् यथा पचतीत्यादौ पाकानुकूलव्यापा-
कारक. २ रवत्त्वे जानातीत्यादौ ज्ञानाश्रयत्वे नश्यतीत्यादौ नाशप्रतियोगित्वे चैत्रेण तण्डुलः पच्यत इत्यादौ पाकजन्यफलाश्रयत्वा-
वारणाय यत्पदसमभिव्याहृतेति एवं चैत्रादेः कर्तृत्वं पचतीत्यादावाख्यातबोध्यधर्ममादायैवेति बोध्यम् धात्वर्थान्वितेति द्वि-
अतिमात्रिकारणत्व ५८ तीयाद्यर्थकर्मत्वकरणत्वमादाय आख्यातेनेति जानातीत्यादावाख्यातार्थाश्रयत्वेन पाककर्तृत्वम् हन्तीत्यादौ हिंसाश्रय-
त्वेन नामनः कर्तृत्वमित्येतत्साधनाय यद्वेति धात्वर्थविशेषणम् यदि च काष्ठं पचति स्थाली पचतीत्यादिप्रयोगवशा- यत्पदसमभिव्याहृतेनेति तेन वाक्ये कर्माख्यातयगादि ६८
त्करणादीनां कर्तृत्वमिष्टम् तदा पच्यत ओदनः स्वयमेवेत्यादौ कर्तृकर्मणोः पिततरिष्टम् ओदनः स्वयं पच्यत इत्यप्रयोगस्य
ओदनः स्वयं पच्यत इत्यादौ ६८ साधुत्वात् कर्माख्यातयगादिना हि विभाव्यते कर्मत्वतद्विशिष्टस्य कर्तृत्वरूपतावारणाय तद्रूपादेयम् न हि कर्मत्वा-
देः कर्तृत्वरूपत्वे न भिहिते कर्तरीत्यनुशासनार्थः संगच्छते इत्याहुः यत्तु स्वतन्त्रः कर्तेति पाणिनिसूत्रात् कारकान्तराप्रयोज्य- फलानुकूलकारकान्तरव्यापाराश्रयत्वं नामाप्रयोज्यत्वम् ६८
त्वे सति कारकान्तरप्रयोजकत्वं कर्तृत्वम् स्वयं तेन युक्तश्चादिजन्यसंयोगरूपव्यापारवत्त्वरूपतत्प्रयोज्यत्वं चैत्रादेः सूत्रार्थः तत्र त्वाष्ट्रादिजन्य
कारणजन्य क्रियानुकूल व्यापाराश्रयत्वम् = न च ईश्वरप्रयोज्यत्वाज्जीवानामकर्तृत्वापत्तेः इच्छाजन्यसंयोगरूपव्यापारवति कुलालादावतिव्याप्तेश्चेति दिक् कर्मत्वं न संयोगादिरूपव्या-
करणव्यापारित्वम् न हि करणजन्यव्यापारित्वम् धात्वेन धात्वर्थ जानातीत्यादौ हस्तादिकरणव्यापारवति दात्रादावतिव्याप्तेः वाराश्रयत्वात् क-
नापि परसमवेतक्रियाजन्यफलशालित्वम् गमिपत्योः कर्मत्वस्यैवं विशेषत्वे स्यात्तदापि परसमवेतत्वे एवं परयोः श्रम- लालादावव्याप्तेः
त्वात् नदीवर्धत इत्यादौ देशविशेषे घोषवत्तायाः परम्परयातीरप्राप्तिरूपफलस्याश्रये तीरे कर्मत्वप्राप्तिश्चेत्यत इति
धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वम् तादृशं गमेः संयोगस्त्यजेर्विभागः पतेरधः संयोगस्तत्र वह्निर्देशविशेषः
संयोग्मा चैतैर्घाणाक्रोपर्ययतापत्तेः स्यन्देश्च धातोश्चनफलाव्यापारे शक्तिरिति न कोऽपि दोषः फलावच्छिन्नव्या- उद्देश्यत्वातिरिक्तविषयत्वाश्रीकारात् २८
पारबोधकत्वादेव धातूनां सकर्मकत्वव्यवहारो न त्वेवं तथा धात्वादीनां नामार्थान्वितोद्देश्यत्वातिरिक्तविषयत्वरूप-
विभक्त्यर्थान्वयार्थकत्वं गौणसकर्मकत्वम् इदं जानातीत्यादितो ज्ञानविषयतावत्त्वं ज्ञानाश्रयत्वेनाशयात्मान्वयबोधः

सकर्मकधातु १८ कर्मप्रत्ययाभावात् १८

तादृशधात्वयोगेऽप्यकर्मकत्वापत्तेः ग्रामं गच्छति भोजनाय पचति इति प्रयोगात् यत्धात्वर्थतामापन्नान्वितस्य
कर्तृत्वे विशेषणत्वेनैवान्वयात् तेषां सकर्मकत्वम् नवा भोजनेनेत्यत्र इति प्रयोगः भूमिं त्यजति विहगो वि
जहाति महीरुहं जनस्त्यानमिति प्रयोगात् स्वस्य धात्वर्थतावच्छेदकसंयोगविभागरूपफलशालित्वे पि क
र्माभावात् परसमवेतक्रियाजन्यत्वमपि धात्वर्थतावच्छेदकफले निवेशयम् नवैवमपि ग्रामं गच्छतीत्यादौ भूमियत्क
त्रसंयोगरूपफलशालित्वात् चैत्रस्येतरक्रियाकर्मत्वरूपव्यवहारः स्यादिति स्यात् परसमवेतक्रियाजन्यतादृशफलशालि
त्वस्यैव तत्कर्मत्वस्वीकारात् द्वेष्यं च द्वितीयार्थः क्रियान्वयिपरसमवेतत्वमप्यर्थः परत्वस्य प्रकृत्यर्थापेक्षया ता
दृशफलत्वाव्यपेक्षया कर्मत्वात्तेन बोध्यते तथा च भूमिं गच्छतीत्यादौ कर्मत्वात्तस्य स्वफले परसमवेतत्वं वाच्या
तार्थः भूमिपदार्थस्य प्रत्येकविशेषणत्वेन फलमतिविशेष्यत्वेन चान्वयः तथा च भूमिभिन्नसमवेतक्रियाजन्यफलशालि
नीभूमिरिति बोधः भूमिं त्यजतीत्यत्र भूमिभिन्नसमवेतभूमिवृत्तिसंयोगजनककर्मत्वाविशेषरूपकं लक्षणान्तरमिति बोधः
एवं च भिन्नसमवेतत्वविशेषवृत्तिसंयोगजनकस्यान्यतरत्वनिगमनं तदनुकूलक्रियाभावाद्वेति मतः स्वग्र
हीति प्रयोगः प्रकृतधात्वर्थस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिकत्वेन प्रतियोगितामात्रेणचान्वयः नापि पृथिवीं
याति विहगो इत्यादौ प्रवयानापत्तेः त्यजति पृथिवीत्वावच्छिन्नत्वात् न हि तीर्थः स्यान्न्यपि त्यजति भयभेदस्त्वात् स्व
यातीत्यापत्तेरिति चेन्न द्वितीयार्थफले प्रकृतस्य तत्क्रियावच्छिन्नप्रतियोगिताकत्वसंबन्धेन प्रकृत्यर्थस्य कर्मत्वेन
र्थफलान्वयिनः स्वरूपत्वेनान्वयात् इत्थं च पृथिवीं प्रयातीत्यादौ पृथिवीव्यक्तिवृत्तिसंयोगजनकत्वं प्रयाणस्य तत्र किमि
त्यत्वविरहोऽतः स्वीति दोषः एकैकपृथिवीमित्यादौ पृथिवीपदेन कर्मभूतपृथिवीव्यक्तिपरमेवमस्य च कर्मेति कर्मत्वसामा
न्यपदेन लक्षणया विशेष्यपरम् अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताया लाभात् कथं केनभङ्गः स्यादिति यन्तु पर
समवेतत्वं नार्थः किन्तु अन्योन्याभावप्रतियोगितावच्छेदकत्वं क्रियान्वयि द्वितीयार्थः तथा च भूमिवृत्तिसंयोगज
नकं भूमित्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वं क्रियान्वयि प्रयाणानुकूलकृतिमानित्यर्थः स्ववृत्तिक्रियायाः
स्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वान्न स्वं प्रयातीति प्रयोगः इति तन्न तथापि येन संयोगेन गतः सो

न

स्वस्मिन्स्वभेदानङ्गीकारात् स्वनिष्ठान्योन्याभावप्रतियोगित्वम् १८

का॰ वा॰
३

तत्स्वदंशमात्र
तत्वांशिनामत्रादिकं
बोधयति तदनया
वतनानुक्रियमाण

विमग्रामं गच्छतीति प्रयोगापत्तेः महांतरनिरूपितप्रतियोगितावच्छेदिकायास्तन्मात्रवृत्तिक्रियायास्तन्मात्र
वृत्तिवृत्तित्वं ग्रामगमनकत्वात् यत्र तत्र फलान्वयस्तस्यैव आधाराभावः तयोः कोटावधारणेन तद्व्याप्तिता
देः प्रकारकैकत्वे कर्मवाचकपदस्य तद्व्याप्तित्वावच्छिन्नलक्षणास्वीकारे युगपद्वृत्तिद्वयविरोधप्रसंगः ननु नान्योन्या
भावप्रतियोगितावच्छेदकत्वं क्रियान्वयि द्वितीयार्थः नवा परसमवेतत्वम् परसमवेतत्वस्वरूपसामान्यधर्माव
च्छिन्नतत्कर्मसमवेतत्वनिरूपितप्रतियोगिताकाभावात्मकस्वप्रतियोगिकाभावसम्बन्धेन कर्मवाचकपदार्थान्वि
तद्वितीयार्थः समवेतत्वस्य क्रियायामन्वयस्वीकारात् सामान्यरूपेण विशेषाभावानभ्युपगमेपि यद्वा द्वितीया
र्थः समवेतत्वं परस्परत्वाक्रिसमवेतत्वत्वावच्छिन्नप्रतियोगिताकाभावात्मकस्वप्रतियोगिकाभावसम्बन्धेन कर्म
वाचकपदार्थान्वितद्वितीयार्थसमवेतत्वस्याधारत्वर्थे क्रियायामन्वयस्वीकारात् क्वापि हृष्टपरत्वविशेषणितत्वा
त्वविशेषस्वीकारात् अतएव न कर्मवाचकपदस्य तद्व्याप्तित्वेन तद्व्याप्तिबोधकतया सामान्यरूपेणाबोध
कतया युगपद्वृत्तिद्वयविरोधः इति चेन्न तन्मते क्रियायाः ग्रामाद्यवृत्तितया तन्निष्ठतदभावप्रतियोगिसमवेतत्वस्या
प्रसिद्धाप्रवृत्तित्वात् महः स्वांगच्छतीति प्रयोगप्रसंगस्य दुर्वारत्वापत्तेः एतेन तन्न क्रियानधिकरणत्वे सति तन्न
क्रियावच्छेदकफलशालित्वं तन्न क्रियाकर्मत्वम् द्वितीयादेरपि तन्न क्रियानधिकरणत्वमर्थ इत्यपास्तम् य
स्मानन्यापत्तेश्च यत्र क्रियान्वयिपरसमवेतत्वमपेक्षकत्वेनान्वयिपरत्वमेव लाघवात्कर्मप्रत्ययार्थ इति तन्न
द्वितीयाद्यर्थफलपरसमवेतत्वयोरेकान्वयित्वेन लाघवात् ग्रामो गम्यते कर्मनि चैत्रस्य इत्यादौ परसमवेतत्व
क्रियाजन्यत्वस्य तस्यैव कर्मपदार्थतया तस्यैव कर्मणो भूतत्वादेः कर्मत्वेन वृत्तान्तर्भूतत्वेपततीति प्रयो
गः स्यादिति चेन्न तथा विवक्षायां भवत्येव प्रत्ययाश्लीलत्वात् तन्मते ग्रामः स्वगमित्वादौ परत्वान्वयिविरहाच्चेति
दिक् सामान्यप्रत्ययः संयोगावच्छिन्नस्पन्दार्थकतया धात्वर्थतावच्छेदकफलशालिनो भूतत्वादेः कर्मत्वेन वृत्तान्
पर्णे भूतले पततीति प्रयोगः स्यादिति चेत् तथा विवक्षायां भवत्येव अतएव द्वितीयाश्रिते तिमत्स्वे पतितगामुगा
मे द्वितीयासमासविधानम् तडदादुर्गते च नरकपतितो नरकपतित इति साधु संगच्छते कश्चित्तु साधु

पि
क्रिया

२

फलस्य द्वितीया

ग्रैष्ठ्याभूमौ पततिग्रामं गच्छतीत्यादौ परे त्वभूतलादेः कर्मत्वेपि न द्वितीया यत्र फलसंबंधाकांक्षा तत्रैव तत्
स्वीकारात् अत्र तु फलस्याधोदेशवृत्तितया उपस्थितत्वेन संबंधाकांक्षा तथाहि कर्तृभिन्नान्वयिफलावच्छि
न्नव्यापारबोधकस्य धातोः सकर्मकत्वम् न तु पतेरधःसंयोगरूपफलस्य पर्णान्वितत्वात् अधःशब्दस्य सम्ब
न्धिसाकांक्षतया सम्बन्धित्वेन पर्णस्यैवान्वयात् भूतले पर्णस्याधः न तु पर्णभूतलस्येति न भूतलं पततीति प्र
योग इति अधः कथं तत्तात्पर्येण अधः पततीति प्रयोग इति चेत् न भ्रमादस्य यो विवक्षया वा गतेति रश्चीनमनूरु
नारद५= सारेत्येति त्यक्तिव्यक्तिविशेषस्याधोधोयाम पतनीत्यर्थान्वयबोधस्य त्याकः यत्र तु त्यजिगम्यादेः स्पन्दाद्यात्मकव्यापार गता
मात्रे शक्तिः फलस्य द्वितीयादिलभ्यत्वात् अत एव ग्रामं गच्छति त्यजतीत्यनयोर्नैकार्थता त्यजिगम्योर्योगे द्वि
तीयादिना विभागसंयोगयोर्बोधनात् त्यजेर्विभागावच्छिन्नस्पन्दशक्तत्वे गमेः संयोगावच्छिन्नस्पन्दशक्त
त्वे तस्य कार्यतावच्छेदकत्वात् अत एव गमनं त्यागश्च अनयोरपि नैकार्थता इत्थं कार्यकारणभावानुरोधे
नात्रापि त्यजिगम्यो विभागसंयोगावच्छिन्नस्पन्दे लक्षणाङ्गीकारात् विभागाद्यवच्छिन्नस्पन्दशक्तत्वे च वि
भागादिस्पन्दयोर्विशेषणविशेष्यभावे व्याप्तिः शक्तत्वम् तेन चैत्रेण ग्राम स्पन्दजन्यतद्देशादिवारणम् जन्यस्पन्दविशेषणक
विभागादिविशेष्यकशाब्दबोधस्य तु द्वयं च वस्तु समवेतत्वात् तथा त्वन्यानितफलविशेषणशालित्वेन तत्तत्स्पन्द
त्वम् तेन स्पन्दादेर्नोत्तरदेशादौ कर्मत्वमिति तन्न विभागाद्यवच्छिन्नस्पन्दशक्तत्वस्य जन्यतावच्छेदकत्वे नाहत्य स्पन्दे
मीमांसको नो शक्तेर्गौरवत्वात् परैरामितत्वाविभागशक्तिर्द्वेषतराशवद्विभागाद्यंशस्य त्यागो न युक्तः त्यागगमनयोरेकार्थतावार
णाय तत्तत्फलविशिष्टस्पन्दे शक्तिसिद्धेर्विभाजितं तन्न तत्प्रतिसन्धानं तथा प्रतीतिरिति दिक् एवं ददातेर्भस्मत्वरू
पं विना स्वविस्वत्वध्वंसपरस्वत्वजनकत्यागः यजतेर्देवतोद्देश्यकस्वत्वध्वंसफलकत्यागः जुहोतेस्त्वग्निप्रक्षे
पणार्थः अत एव जुहोतिना त्यागाभावेपि होतृत्वम् अग्निप्रक्षेपणम् अग्निसंयोगानुकूलक्रियायाम् लक्षणाद
मोहनादिव्यापारः तेनैव यागोऽयं यज्ञ इत्यादौ तत्र स्वत्वस्यापि संयोगान्वये निराकांक्षतेति वाच्यम् अत्र संयोगा

वृत्तित्वस्य

का॰ वा॰
४

उत्कृष्टक्रियानुकूलव्यापारस्यैव धात्वर्थत्वात् न च तथाप्यग्नेः कर्मत्वापत्तिः संयोगस्य धात्वर्थतानवच्छेदकतया तद्(
तोऽग्नेः कर्मत्वाभावात् क्रियाया एव धात्वर्थतावच्छेदकतया तच्छालिनो घटस्यैव कर्मत्वात् द्वितीयार्थस्य वृत्तित्वम् त
च्च धात्वर्थतावच्छेदकेऽन्वेति इत्थं च विप्राय गां ददाति विप्रोद्देशेन तदीयस्वत्वं न ददातीत्यादौ मूल्यग्रहणं विना विप्रोद्देश्यक
गोवृत्तिस्वस्वत्वध्वंसपरस्वत्वफलकत्यागानुकूलकृतिमानित्यन्वयबोधः विप्रोद्देश्यकत्वसम्बन्धेन स्वस्वत्वध्वंस
सफलकत्वात्मकमेव त्वम् विप्रोद्देश्यकस्वस्वत्वध्वंसफलकत्यागानुकूलकृतिमानित्यन्वयबोधः द्वितीयापि संयो द्व
गावच्छिन्नक्रियानुकूलव्यापारानुकूलकृतिमानित्यन्वयबोधः एवं मूल्यग्रहणप्रयुक्तस्वस्वत्वध्वंसफलकत्या
गो विक्रयः मूल्यदानप्रयुक्तस्वस्वत्वोत्पादकस्वीकारः क्रयः द्रव्यस्वत्वजनकस्वीकारः प्रतिग्रहः तथा च स्व
गां विक्रीणाति गां क्रीणाति गां प्रतिगृह्णातीत्यादौ गोवृत्तिमूल्यग्रहणप्रयुक्तस्वस्वत्वध्वंसफलकत्यागानु(
कूलकृतिमान् गोवृत्तिमूल्यदानप्रयुक्तस्वस्वत्वानुकूलस्वीकारानुकूलकृतिमान् गोवृत्तिद्रव्यस्वत्वज
नकस्वीकारानुकूलकृतिमानिति क्रमेणान्वयधीरिति सम्प्रदायः इदमत्राभिधेयम् दानस्य परस्वत्वजनकत्वे
न तस्य विक्रयवारणे मूल्यग्रहणं विनेति व्यर्थम् अथ प्रतिग्रहरूपस्वीकारविशेषस्य स्वत्वहेतुः अस्वामिके
स्वीकारस्य स्वत्वहेतुत्वाकल्पनात् अत एव याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेदित्यादिकं साधु सङ्गच्छ
ते अन्यथा प्रतिग्रहस्य वैफल्यापत्तेः दानं तु स्वस्वत्वध्वंसमात्रजनकं परस्वत्वप्रयोजकमिति मतं तथापि तद्वै
यर्थ्यम् तदुपादानेऽप्युपेक्षायामतिव्याप्तेः तस्यापि स्वस्वत्वध्वंसद्वारा परस्वत्वप्रयोजकत्वात् तद्वारणाय वै(
जात्योपादानस्यावश्यकत्वात् वस्तुतो दूरस्थेनाप्यमुद्दिश्य त्यक्तद्रव्यस्य प्रतिग्रहात् प्रागस्वामिकस्यानुद्देशेन
[illegible] प्रतिग्रहात् स्वत्वं स्यादिति अन्योद्देश्यकत्वादेः प्रतिबन्धकत्वे गौरवम् न च त्यागमात्रं दानाभास एव
स सम्प्रदानकोटिप्रवेशो दानम् सम्प्रदानत्वं च ददस्वत्वानुमतिप्रकाशनद्वारा दानक्रियोद्देश्यत्वेन न तु [illegible]
हितस्य तत्त्वमिति ननु तदा [illegible] स्वत्वनाश इति वाच्यम् गोर्थित्वं [illegible] ४

केयमिष्याहीनदोषभाक् मनसापात्रमुद्दिश्य भूमौ तोयं विनिःक्षिपेत् विद्यते सागरस्यान्तो दानस्यान्तो न वि-
द्यत इति वाक्यात्तादृशादानसिद्धेस्तस्माद्दानमेव परस्वत्वजनकम् प्रतिग्रहप्रागभावस्यापि दातृणीयत्वात् न प्रतिग्र-
हस्यैव फलम् अत एव यस्मै दत्तं तेन स्वाप्रतिग्रहेऽपि न दातुः स्वत्वनिवृत्तिः अस्तु वा दत्तद्रव्यस्य स्वीकारत्वरूपप्रतिग्रहत्वे
न स्वीकर्तृमात्रनत्वेन वेति विनिगमकाभावाद्दानस्य स्वत्वध्वंसद्वारा परस्वत्वप्रयोजकम् प्रतिग्रहस्य तु स्वत्वजन-
कः उभयथापि मूल्यग्रहणं विनेति यावत् विक्रियस्य परस्वत्वजनकत्वे मानाभावात् न च विक्रीतद्रव्यस्वीका-
ररूपक्रियत्वेन क्रीतत्वेन [illegible] विक्रयत्वेन वा क्रियस्य [illegible] अत्रापि विनिगमनाविरहः मूल्यदानपूर्वकस्वीकारस्यैव
क्रयत्वात् विक्रयत्वस्य गौरवेणानिवेशात् किञ्च स्वस्वत्वध्वंसजनकत्वमपि माश्रयेम आवश्यकत्वात् अपि चाग्नि
प्रक्षेपो होम इत्यपि युक्तम् देवतोद्देश्यकस्वस्वत्वध्वंसफलकत्यागो यागः स एव प्रक्षेपावच्छिन्नो होम इति वाचस्पतिमि-
श्रोक्तेः याग एव वह्निउद्देश्यप्रक्षेपोपहितो होम इति विवेकोक्तेश्च अस्तु च वह्नित्विनां [illegible] यागादौ यजमानस्वस्वत्वध्वं-
सोऽनुमतः देवस्य यागादिदेशस्य स्वामित्वबाधात् [illegible] सावत् वस्तुतस्तु दानत्वयागत्वहोमत्वादयो मानसप्रत्यक्षगम्या
जातिविशेषाः न च श्राद्धस्य पित्र्युद्देश्यकयागत्वात् [illegible] पित्रुद्देश्यकत्वाद् दानत्वमिति विवेककृतः तयोः साङ्कर्येणैव जातित्व-
मिति वाच्यम् श्राद्धस्योभयरूपत्वात् वस्तुतः श्राद्धस्य यागत्वमेव उद्दिश्य पित्रादेः स्वत्वाजनकत्वात् ब्रा-
ह्मणस्य स्वत्वमपि न सार्वत्रिकम् ब्राह्मणभोजनविधिश्राद्धोक्तेः पितृस्तु यो न विशेषाद्यादि [illegible] स्मृति-
पद्धेः विश्वेदेवादि [illegible] न च मनसा [illegible] दानविषयत्वम् देवतायाः स्वत्वापत्ति-
मेव यागत्वे दानत्वव्याप्यम् होमत्वं यागत्वव्याप्यमिति तु सर्वसिद्धम् देवपूजादिकमपि याग एवेति कृतमप्रकृ-
तेन अत एव समस्तसाधारणस्वत्वनाशानन्तरं साधारणस्वत्वोत्पादात् तत्र सकलविशेषणे [illegible] इति दानसत्त्व-
मिति [illegible] व्याप्तिरिति परास्तम् दानत्वजातेस्तत्राभावात् परमात्मवृत्तित्वानुकूलत्वविशेषणस्य [illegible] निरासः
स्यैव तत्र न स्वत्वनाशः किन्तु परत्वोत्पत्तिमात्रम् न च स्वस्वत्वापत्तिपरस्वत्वानुपपत्तिः स्वेच्छाधीनत्वेन कत्वादि-
स्व

ति स्वत्वध्वंसपूर्वकत्वविशेषणेनैव तन्निरास इति चेत् परस्वत्वविशेषजनकत्वविशेषणेनाप्याह निरित्या
ङ्कः एतेन विनिमये विक्रयलक्षणातिव्याप्तिरित्यपास्तम् विक्रयत्वादेर्जातित्वात् मूल्यातिरिक्तद्रव्यग्रहणप्रयुक्त
स्वस्वत्वध्वंसपरस्वत्वानुकूलव्यापारो विनिमयः इत्यस्य इत्यलमतिविस्तरेण किमिदं स्वत्वमिति चेत् अत्र प्राचीनाः य
थेष्टविनियोगार्हत्वं स्वत्वम् तच्च शास्त्रानिषिद्धविनियोगविषयत्वम् प्रतिग्रहादिजन्यविषयत्वम् तच्च न बहिरि
न्द्रियग्राह्यं विषयम् प्रतिग्रहादेर्मानसज्ञानविशेषस्य बहिरिन्द्रियायोग्यत्वादित्याहुः नव्यास्तु प्रतिग्रहादिनाशो
त्तरमपि स्वत्वव्यवहारस्य प्रामाण्यानुरोधात् स्वत्वमतिरिक्तपदार्थः तच्च स्वत्वं दानादिना नश्यति प्रतिग्रहादिना च स्व
त्वं जन्यते तच्च बहिरिन्द्रिययोग्यं स्वं पश्यामीति प्रतीतेः तदीययथेष्टविनियोज्यत्वज्ञानस्य तदीयस्वत्वसाक्षा
ज्ञान त्कारे हेतुत्वात् अन्यथेष्टविनियोगार्हस्य यस्य स्वत्वसाक्षात्कारापत्तिः स्वत्वस्य तदीययथेष्टविनियोज्यत्वे तदीयस्वा
त्वव्यभिचारित्वग्रहदशायां तद्रूपेण स्वत्वसाक्षात्कारादित्याः तदीयस्वत्वसाक्षात्कारे प्रति तदीयस्वत्वव्याप्यतदीय
यथेष्टविनियोज्यत्ववदिदमिति साकारकज्ञानस्य हेतुत्वं वाच्यम् तथा च स्वत्वस्यातीन्द्रियमिति रेव न तत्साक्षात्कारः स्व
त्वे लौकिकविषयताकल्पने लौकिकविषयितया लौकिकसाक्षात्कारत्वादृशविशेषणस्य हेतुत्वकल्पने च गौ स्वत्वांशे ८=
रवात् स्वं पश्यामीत्यनुव्यवसायस्तु सुरभि चन्दनं पश्यामीत्यादिवत् ज्ञानलक्षणाजन्यलौकिकप्रत्यक्षविषयतावगाहीन
त्वायोग्यत्वकल्पने लौकिकसाक्षात्कारे स्वत्वस्य प्रतिबन्धकत्वकल्पने च गौरवमिति वाच्यम् तस्यायोग्यत्वकल्पने
लौकिकविषयताविरहादेव तत्प्रत्यक्षाभावसम्भवात् योग्यत्वे तु लौकिकप्रत्यक्षसामग्र्याः सत्त्वात्तु
मित्यादौ प्रतिबन्धकत्वकल्पने गौरवादित्याहुः तच्च कर्म त्रिविधम् प्राप्यं विकार्यं निर्वर्त्यं च तत्र संयोगादिक्रिया
जन्यफलशालि प्राप्यम् यथा ग्रामं गच्छतीत्यादौ ग्रामादि यत्र कर्मता कमेवावस्थान्तरमापद्यते तद्विकार्यम् यथा
काष्ठं भस्म करोतीति सुवर्णं कुण्डलं करोतीत्यादौ काष्ठादि परत्वस्य काष्ठावयवादेः सत एव भस्मादिसम्बन्धरूपा
वस्थान्तरप्राप्तेः यत्र क्रियाजन्यकर्मनाशकफलजनकं तद्विकार्यम् यथा काष्ठं लुनातीत्यत्र छिन्नत्वमिति तन्न
काष्ठपरत्वस्य काष्ठावयवस्य कर्मत्वाक्रियायाः कर्मनाशकत्वासम्भवात् अत्र हि काष्ठपदस्य काष्ठावयवे ५

अवयव

नाशक

त्वं नाम आरम्भकसंयोगप्रतिद्वन्द्विविभागादिजनकक्रियानुकूलव्यापारो धात्वर्थः तथा च काष्ठावयववृत्त्यारम्भकसंयोगप्र
तिद्वन्द्विविभागजनकक्रियाजनकव्यापारानुकूलकृतिमानित्यन्वयबोधः काष्ठावयवस्य प्राप्यकर्मतैवाव्यस्यात
स्थायिभावान्वितक्रियाधेता तण्डुलं पचतीत्यादौ तण्डुलपदलक्ष्यतण्डुलावयवः पच्यर्थोद्रव्यादिपरात्वक्रिया
विक्लित्त्यवच्छिन्नो वा तेन संयोगः तथा च धात्वर्थजन्यफलशालित्वात्तण्डुलावयवस्यापि तत्प्राप्तेर्योगमयविधकर्मत्वं त
ण्डुलावयवस्यैव [illegible] इष्टापत्तिर्युक्तमेवेत्यदोषः यत्क्रियया [illegible] तेन [illegible] यथा वटे कटमाकरो
तीत्यादौ वटादि प्रयुक्तः फलावच्छिन्नव्यापारबोधकत्वाभावाद् द्वितीयकर्मत्वम् तच्च [illegible] विषयत्व
ग्रन्थं [illegible] करोतीत्यादि न प्रयोगः [illegible] विषयत्वाभावात् यत्र कटादिपरस्प
कटावयवे निरूढलक्षणा तत्र विना लक्षणां कटादेः कर्मत्वसम्भवे [illegible] कारकत्वासम्भवात् निरूढलक्षणा
[illegible] कर्ता [illegible] करोतीति प्रयोग इति तत्र [illegible]
[illegible] कटादेः [illegible] सम्भवात् [illegible] पचतीत्यादौ क्रियाविशेषण [illegible] द्वितीयावि
भक्तिविभक्तिवत् [illegible] नामार्थधात्वर्थयोरभेदान्वयस्य [illegible] कारणे [illegible] तदस्मि
कारे विशेषणविभक्तिवदस्मत्संभेदात् [illegible] कारकत्वाभावस्तु क्रियान्वितकर्तृत्वाद्यन्वितत्वाभावादि

वे ति दिक्. करणत्वं कारकान्तराचरितत्वे सति क्रियाहेतुत्वम्. कारकान्तरनिष्ठव्यापारद्वारा क्रियाहेतुत्वाभा
वः स्वतन्त्रत्वात् [illegible] कर्तृकारके आरम्भकसंयोगप्रतिद्वन्द्विविभागानुकूलकुठारादिक्रियायाः [illegible]
[illegible] कुठारादिकरणनिष्ठव्यापारद्वारा छिदादिहेतुत्वात् [illegible] कर्मणस्तु तादृशक्रियाहेतु
त्वविरहादेव नातिप्रसङ्गः अधिकरणमपि कर्तृकर्मान्यतरव्यापारद्वारा क्रियाहेतुः [illegible]
[illegible] पचतीत्यादौ गृहस्थाल्यादिरधिकरणं कर्तृकर्मसंयोगद्वारा पाकादिक्रियासाधनम् सम्प्रदानत्वानुम
तिप्रकाशनेन [illegible] दानानिमित्तम् अपादानं पतनप्रतिबन्धकसंयोगनाशकपवनादिविभागद्वा

[illegible]

का॰वा॰
६
6

रापतनादिनिमित्तमिलितानिश्चमेव: नचैवं कुठारादिकरणस्यापि कर्तृनिष्ठव्यापारसापेक्षत्वादसम्भवः का
रकांतरनिष्ठव्यापारसम्बन्धावच्छिन्नजनकत्वाभावस्य सत्त्वेनार्थकृत तथा कुठारादिक्रियायाः पक्षिदारादिक्रियायां
कुठारस्य नात्मसम्बन्धेन हेतुतया कर्तृनिष्ठव्यापारसम्बन्धेनाहेतुत्वात् नचैकत्र कुठारामित्रा नैयायिकाः
तस्यापि तन्मतेतुल्यत्वात् अत एव फलावच्छिन्नयोगव्यवच्छिन्नकारणं करणमिति वदन्ति वस्तुतस्तु व्यापारवत्
वे सति कारणत्वं करणत्वम् नचैवं काष्ठे ज्ञाने ज्ञानादौ चात्मनो मनोयोगस्य च व्यापारस्य सत्त्वात् आत्मनो
॰पि विकरणत्वापत्तिरिति वाच्यं इष्टापत्तेः पूर्वं कर्तृत्वकरणत्वलक्षणोपाधेः सत्त्वाद् व्यवहारभेदोपपत्तेः इत्यच्चा
क्षुमितौ व्याप्तिज्ञानं करणम् परामर्शस्य व्यापारत्वात् चाक्षुषे च चक्षुरादि तत्संयोगस्य व्यापारस्य सत्त्वात्
श्रावणज्ञाने श्रोत्रम् मनःश्रोत्रसंयोगस्य व्यापारस्य सत्त्वात् नचैवं शरीरस्यापि अभिप्रायात् परे
तु फलानुकूलव्यापारवत्त्वं करणत्वम् अस्ति च कुठारादेः छिदाया फलजनकसंयोगादिमत्त्वम् नचैवं
स्थाल्यादेरधिकरणस्यापि कर्तृव्यापारवत्त्वात् करणत्वापत्तिरिति वाच्यं स्थाल्या न साधयति गवा दानेन साध
यति आत्मनो दानेन साधयति इत्यादि प्रयोगात् ज्ञापितदिष्टम् चैत्रात्मना चैत्रेण वा पचति इत्यादि प्रयोगात्
कर्तुः शरीरस्य च व्यापारस्य यत्नस्य समवायिभिन्नत्वेन क्रियानुकूलकृतिमत्तो भिन्नत्वेन विशेषणम् कृतिमतः
समवायेनावच्छेदकतया तेन शरीरस्यापि भिन्नत्वेन हस्तादिसङ्ग्रहः हस्तादिना छिनत्
ति इति प्रयोगात् व्यापारवत्त्वे सत्यनकर्तृयाते साधारणमिदमङ्गः अत्र परे तु नाच्छिनत्ती
करणता
ति इत्यादौ निरूपककरणत्वं ल्यायार्थः आश्रयत्वेन प्रकृत्यर्थान्वितस्य निरूपकत्वेनान्वयः
तथा च परशुनिष्ठकरणतानिरूपकच्छिदानुकूलकृतिमानिति वाक्यार्थ इति प्राञ्चः नव्यास्तु परा
शुना छिनत्ति इत्यत्र तृतीयार्थो नञर्थान्वयानुरोधेन निरूपकतकरणतानिरूपितजन्यत्वमवच्छेदकार्थः
जन्यत्वस तस्य च निरूपितत्वेन प्रकृत्यर्थान्वितस्य आश्रयतया धात्वर्थेऽन्वयः इत्थं च परशुनिरूपितजन्यत्ववद्छिन्नि ६

इच्छासमवायिभिन्नसम वायावच्छेदकताभिन्नस म्बन्धावच्छिन्नतन्निष्ठ यानुकूलकृतिनिरूपि ताधिकरणतावच्छिन्नत्व सतिजनकतावच्छेदक सम्बन्धेन फलानुकूल कर्तृव्यापारवत्त्वकरण त्वमिति कश्चित् ॥

तथा च नयमते परमुनिरूपितजन्यत्वाद्यावनिरूपितजन्यत्वाभावोऽभयाश्रयक्रियाद्वारकत्वलक्षणमानित्यन्वयबोधः = १

उपलक्षणत्वे ८

रूपितजन्यताभावस्य क्रियायामन्वेतीत्याहुः जटाभिस्तापस इत्यादौ तृतीयोपलक्षणे तत्त्वं चान्वयितावृ-
त्त्यनवच्छेदकत्वे सत्यतद्व्यावृत्तिसमानाधिकरणत्वम् अस्ति च जटानामपि तापसत्वाव्याप्त्यनवच्छेदकत्वं शमा-
दिमत्त्वस्य वा तस्य नानातिरिक्तवृत्तितया तदवच्छेदकत्वात् शमादिना तापस इत्यप्रयोगोऽविवक्षितत्वात् तथा
प्रयोगस्येष्टत्वे तु विशेषणोपलक्षणसाधारणं विशिष्टमेवेत्यर्थः । अक्ष्णा काणः पादेन खञ्ज इत्यादौ
येनाङ्गविकार इति सूत्रेण तृतीया येनाङ्गेनाङ्गिनो विकारो लक्ष्यते तन्निरूपिताधिकरणत्वबोधकात्तृतीयेति सूत्रा-
र्थः एवं च तृतीयाया वृत्तित्वमर्थः तत्र स्वमुत्पत्तिवेत्ति आत्मकाणादिपदार्थस्यैकदेशविकारेणैवेति काणत्वं चक्षु-
रिन्द्रियावच्छेदेन चक्षुः शून्यगोलकवत्त्वम् जातमात्रान्धस्याकाणत्वे तच्च तदङ्गगोलकवत्त्वे सतीति वाच्यम् यदि
चक्षुरिन्द्रियावच्छेदेन चक्षुः सत्वेऽप्युपहतादेर्वा तदा तत्रोपहतगोलकवत्त्वमेव काणत्वम् अक्षिपदं च तत्सगोल-
कपरम् तथा च तादृशगोलकनिरूपितनयनस्य स्वस्वरूपप्रापितो वा तद्विशिष्टगोलकवानित्यक्ष्णा काण इत्यस्यार्थः एवं च
खञ्जत्वं संस्थानविशेषशून्यपादवत्त्वम् तथा च पादनिरूपितयथाविधसंस्थानशून्यत्वं तद्विशिष्टवानिति पादेन ख-
ञ्ज इत्यस्यार्थः परे तु अक्ष्णा काण इत्यादावभेदे तृतीया तथा च तादृशगोलकाभिन्नचक्षुः शून्यमुपहतं वा त-
द्वानिति वाक्यार्थः एवं रीत्यैव त्रिलोचन इत्यत्र त्रिलोचनपदं लोचनत्रयविशिष्टवत्परम् तथा च मुखाभिन्न-
लोचनत्रयविशिष्टवानित्यर्थ इत्याहुः धनेन कुलमित्यादौ हेतुत्वे तृतीया क्रियायामन्वयि निरूपककरणत्वा-
दिकं तृतीया कर्तृकरणयोस्तृतीयेत्यनेन विहिता हेतौ इति सूत्रेण तत्र नामार्थान्वितहेतुत्वार्थिकेति विशे-
षः पुत्रेण सहागतः पितेत्यादौ तृतीयायाः कर्तृत्वमर्थः सहशब्दसमभिव्याहारे तु धात्वर्थः सहशब्दार्थः प-
कर्तृत्वादिरूपैकदेशावच्छेदेन एककालीनसम्बन्धेन तत्समभिव्याहृतक्रियायामन्वयः तथा च पुत्रक-
र्तृकागमनसमानकालीनतत्समानदेशसमानकालीनागमनकर्तृत्वार्थः शिष्येण सह गुरुः प्लवते
पुत्रेण सह पिता सुन्दर इत्यादौ सहार्थो ब्राह्मणादिः समानकालीनत्वसम्बन्धेन ब्राह्मणादिपदार्थैकदेशे

अङ्गविकारश्च कृतकः शून्यत्वोपहतान्यतरविकारवद्गोलकवानित्यन्वयबोधः = ९

धनहेतुकं कुलमिति धीः कुलपदे व्यत्ययम् ... = ८

सप्त ...

द्वेति यथा च शिष्यहन्त्रिवाल्लतावसमानकालीनव्यालणत्ववानुग्रहरित्यन्वयधीः एवं च हन्ति सन्त्वस
मानकालीनहन्तृत्ववान् चैत्र इति बोधः एवं तत्र सत्यार्थः सादित्वमेकधर्ममात्रं तृतीयार्थो हन्तिः तेन सह ह्या
मात्रं वा सादित्वाच्च कैः दैवसवच्चविधेयान्वयः तथा च शिष्यहन्ति सादित्वाद्वानुग्रह ओत्पणं इत्यादिबोधः इत्याहुः
एके तु आपि च तु चैत्रसहितौ त्वपितिनिर्भयम् सहैव दशभिः पुत्रैर्भारं वहति गर्दभी १ इत्यादौ पुत्रेषु भारवाहनक
र्तृत्वाभावेऽपि सहप्रयोगे विद्यमानेत्यधाहारा विद्यमानत्वं सादित्वं सहार्थः तथा च एककालीनत्वसम्बन्धेन द
शपुत्रहन्ति विद्यमानत्वविशिष्टविद्यमानत्ववति आश्रयसमवेतधात्वर्थं तावच्छेदकाभिमतदेशप्राप्त्यनुकूलभा
रवत्समवेतवर्तमानक्रियानुकूलकृतिमती गर्दभी त्याकारकान्वयबोधः अत एव विद्यमानसहार्थं तृतीयेति
शाब्दिकाः धान्येन धनी गोत्रेण गार्ग्यः प्रकृत्याभिरूप इत्यादौ तृतीयाऽभेदे तथा च धान्याभिन्नधनवान् गोत्रा
भिन्नगर्गकुलापत्यं साहजिकाभिन्नरमणीयतावान् इत्यर्थः प्रकृतिपदस्य साहजिकार्थत्वात् अभिरूपपद
स्य रमणीयतावदर्थत्वादिति दिक् कर्मणा यमभिप्रैति स सम्प्रदानमिति पाणिनिसूत्रम् तत्क्रियाकरणीभूते
न तत्क्रियाकर्मणा यमभिप्रैति फलभागित्वेनोद्देश्यीकरोति स सम्प्रदानमिति सूत्रार्थः करणीभूतकर्मजन्यफ
लभागित्वेनोद्देश्यत्वं सम्प्रदानत्वमिति फलितम् ग्रामं गच्छतीत्यत्र गमनकर्मग्रामजन्यसंयोगादिभागित्वेनोद्देश्य
स्य चैत्रादेस्तत्क्रियायां सम्प्रदानत्वाभावात् तद्वारणाय करणीभूतेति गमनक्रियायाश्च ग्रामस्याकरणत्वान्न दो
षः यत्नादौ तद्द्वयापत्तिः किंकारणमिति प्रश्ने तत्समाधिः स्वस्वपित्रादिस्वर्गोद्देशेन कृतगोदानादिस्थले तज्जन्यफ
लभागित्वेन स्वस्वपित्रादिरुद्देश्यत्वेन गोजन्यफलभागित्वेनेति तस्य स्वपित्रादेः सम्प्रदानत्वम् अत एव पित्रे
गां ददातीति न प्रयोगः यदि तादृशोद्देश्यता गोरपि जन्यत्वं फले दत्ता गौः स्वस्वपितृस्वर्गमुत्पादयिष्यतीति बुद्धिसि
द्धिस्तदा फलेकर्मजन्यत्वमहणाद्दारकं शास्त्रम् अत एव गमस्वामिन्यत्वकर्तृकदानसम्प्रदानत्वापत्तिः न वा चेत् (
पित्रादये गां ददातीति प्रयोगप्रसङ्गः वस्तुतो धात्वर्थतावच्छेदकत्वेन फलविशेषणम् स्वस्वपितृस्वर्गादिकं तु न (८

विप्रसंबंधि

तथोक्तदोषः इत्थं च विप्राय गां ददातीत्यादौ सम्बन्धित्वेन परेच्छाविषयत्वं चतुर्थ्यर्थः चैत्राय चैत्रो ग्रामं ग
च्छतीत्यादिवारणाय परेति स च धात्वर्थतावच्छेदकफलेऽन्वेति वृत्तित्वं द्वितीयार्थः तथा च विप्रसम्बन्धित्वे
न परेच्छाविषयो यो वृत्तिस्वत्वध्वंसपरस्वत्वानुकूलत्यागानुकूलकृतिमानित्यन्वयधीः एवं च जन्यफलप्र
कारकेच्छापूर्वकत्वं क्रियान्वयि चतुर्थ्यर्थः सूर्याय निवेदितमित्यत्र तदेकदेशे जन्यत्वे कर्मणो गवादेर्निरूपिता
त्वसम्बन्धेनान्वयः तथा च विप्रविषयकगोरुद्देश्यत्वनिरूपितजन्यफलप्रकारकेच्छापूर्वको गोवृत्तिस्वस्वत्वध्वंसप
रस्वत्वानुकूलत्यागानुकूलकृतिमानित्यन्वयधीरिति तत्र गोजन्यफलस्य प्रकृते स्वत्वरूपतया विप्रविषयिकृ
या गोजन्यफलप्रकारकेच्छापूर्वकत्वस्य दानेऽसम्भवात् तादृशेच्छाया एव दानत्वात् गोरुद्देश्यत्वेनेति दिक् एवं
वृक्षायोदकमासिञ्चतीत्यादौ संयोगानुकूलद्रवद्रव्यक्रियानुकूलव्यापारो धात्वर्थः वृत्तित्वेनेच्छाविषयत्वं च
तुर्थ्यर्थः स च धात्वर्थतावच्छेदकसंयोगेऽन्वेति वृत्तित्वरूपं द्वितीयार्थोऽपि तादृशद्रवद्रव्यक्रियायाम् तथा च
वृक्षवृत्तित्वेनेच्छाविषयसंयोगानुकूलद्रवद्रव्यवृत्तिक्रियानुकूलव्यापारानुकूलकृतिमानित्यन्वयधीः अत्र
क्रियायाः धात्वर्थत्वे वृक्षस्य कर्मत्वं स्यात् जलस्य क्रियाया वृक्षापेक्षया परसमवेतत्वात् न चैवं पयसा वृ
क्षमासिञ्चतीत्यत्र कर्मत्वं न स्यात् धात्वर्थतावच्छेदकक्रियाया वृक्षावृत्तित्वादिति वाच्यम् अत्र क्रियानु
कूलव्यापारस्य धात्वर्थतया धात्वर्थतावच्छेदकद्रवद्रव्य[illegible]वृत्तित्वात् द्रवद्रव्यसंयोगस्यैव धात्व
र्थ इति न दुष्कृतम् ततोऽपि फलावच्छिन्नव्यापारबोधकतया धातोः सकर्मकत्वम् धात्वर्थतावच्छेदकफलशा
लित्वाभावाद् गत्यादेरकर्मकत्वं च स्यात् एवं चाजां ग्राममनयतीति वह्निकर्मकत्वं स्यादिति नाशङ्कनीयम् क्रि
याया धात्वर्थत्वे धात्वर्थतावच्छेदकफलदशाभावात् तादृशक्रियानुकूलव्यापारार्थत्वे च क्रियायामेव द्वितीया
र्थवृत्तित्वान्वयात् क्रियावच्छेदकसंयोगे तदन्वयात् चतुर्थ्यर्थस्योद्देश्यत्वस्यैवान्वयो न द्वितीयार्थस्य
सूर्याय निवेदितम् चतुर्थी सम्भविता आहृत्य धातोस्तादृशव्यापारार्थत्वात् एवं अजां ग्रामं नयती

॥ हो ...

इच्छाविषयं
इच्छाहेतुफलपल्लवादिजनकोद्देश्यकक्रियानुकूलव्यापारानुकूलकृतिमान् = शत्रुहन्तीच्छाविषयभूःखादिजनकास्त्रहस्तक्रि
यानुकूल॰ - मित्रहन्तीच्छाविषयवाग्निज्ञानादिजनकहस्तक्रियानुकूलज्ञानानुकूलकृतिमान्
त्वं गमनं
विभागान
कूल॰

का॰वा॰ ८
त्वं ग्रामस्य न सम्प्रदानत्वम् अत्र द्विसंयोगानुकूलक्रियानुकूलव्यापारः प्रेरणादिर्धात्वर्थः द्वितीयार्थो
वृत्तित्वं संयोगे ग्रामपदोत्तरद्वितीयार्थः क्रियायाम् अजापदोत्तरद्वितीयार्थो वेति तथैव व्युत्पत्तेः तादृशफलभा
8 गित्वेन ग्रामादेरुद्देश्यत्वात् सम्प्रदानत्वम् तथोद्देश्यविवक्षायां तु ग्रामायाजां नयतीति भवत्येवेति दिक् परे
द्वा च्छजन्यमानद्वारस्वत्वभागित्वेनोद्देश्यत्वं सम्प्रदानत्वम् त्यागोऽत्र विलक्षणव्यापारः तेन विक्रियादौ क्रेत्रादेर्न
सम्प्रदानत्वम् कर्मणा दानेन कर्मणा यमभिप्रैति तत्सम्प्रदानमिति कर्मणेत्यादिसूत्रार्थः अत एव सम्प्रदीय
ते यस्मै इति सम्प्रदानसंज्ञा व्युत्पत्त्यैव श्राद्धादौ पित्रादेर्न स्वत्वभागित्वेनोद्देश्यत्वम् किन्तु प्रीतिभागितयेति
सम्प्रदानत्वाभावेन सम्प्रदानचतुर्थ्यसम्भवात् नमः स्वस्तीत्यादिनाऽस्वीकारेण तत्र चतुर्थी एवं च वृक्षायोद
कमासिञ्चतीत्यादौ वृक्षादौ सम्प्रदानत्वाभावेन सम्प्रदानचतुर्थ्यप्रयोगो गौणः चतुर्थी प्राप्स्यर्थः अत एव श
त्रवे स्वं प्रयच्छतीति मित्राय ग्रहणं प्रयच्छतीत्यादौ धात्वर्थतावच्छेदकफलभागित्वेनोद्देश्यत्वाभावेऽपि चतुर्थी वि
भागानुकूलक्रियानुकूलव्यापारो मोचनम् संयोगानुकूलक्रियानुकूलव्यापारः प्रेरणमिति धात्वर्थता ज्ञाता
वच्छेदकक्रियारूपफलजन्यफलशालित्वेन शत्रुमित्रयोरुद्देश्यत्वम् इत्थं चोदकादिजन्यफलपल्लवाद्य
स्त्रजन्यभूःखादिहननजन्यवाग्निज्ञानादिफलशालित्वेनोद्देश्यत्वमेव हन्तादेः प्रयादिचतुर्थी तत्र यथार्थः न च शु
क्लाय हेतोर्न गुरवे ब्राह्मणाय भार्यां वा विप्रेषु गां ददातीति स्यात् तथाविवक्षाया अभिष्टत्वात् अत एव रजा
कसम्बन्धित्वस्य नाशप्रविषयत्वे रजकस्य वस्त्रं ददातीति प्रयोगः वस्त्रजन्यफलभागितयोद्देश्यत्वस्य तस्य
तु रजकाय वस्त्रं ददातीत्येव भवितव्यम् न च तथा श्राद्धादावपि पित्रादेः प्रीतिभागितयोद्देश्यत्वात् पुनर्येना
~~[illegible]~~ गौणसम्प्रदानचतुर्थीवोपपत्तेर्नमः स्वस्तीत्यादिसूत्रानर्थक्यम् यत्किञ्चित्क्रियाकर्मज
न्यफलभागित्वेनोद्देश्यत्वस्यैव गौणसम्प्रदानत्वरूपतया नमः पदार्थादेः क्रियात्वाभावेन एवाक्षत्वप्र ट
सायनात् नारदाय रोचते कलहः देवदत्ताय शतं धारयतीत्यादौ तु नारदादेः सम्प्रदानता किन्तु रुच्य राम:

र्थानां प्रीयमाणः धारेरुत्तमर्ण इति सूत्राभ्यां सम्बन्धमात्रे चतुर्थी तथा च तद्धर्मिसम्बन्धो धात्वर्थतावच्छि
न्नाख्योऽनेन विषयतायो ध्यत इति नारदस्य रुचिविषयः कलह इत्याद्यस्यार्थः पुनस्तेन मङ्गीकृत्य द्रव्यग्रहदा
णधारणम् वैश्यस्य शतकमकर्णाहस्याग्रहणश्राय इत्यन्तस्यार्थः सम्प्रदानस्य कारकत्वं धात्वर्थतावच्छेदक
स्वत्वनिष्पादकत्वेन रजकस्य वस्त्रमिति प्रकाशनेन दोहरिकाशुनाद्यदानसम्पादनेन वेति परे तु भागजन
स्वस्वत्वजनकस्वीकारवत्त्वं सम्प्रदानत्वम् श्राद्धादौ पित्रादेः स्वीकारः कल्प्यत एव गौरदातीमादावपि गोत्वस
म्प्रदानत्वादेश्यत्वरूपमिमाहुः परकीयक्रियाजन्यविभागाश्रयत्वमपादानत्वम् वृक्षात्पर्णं पततीत्यादौ
पत्रादेरपादानत्ववारणाय परकीयेति अत्र पञ्चम्या विभागजनकत्वमन्योन्याभावप्रतियोगित्वं चार्थः विभा
गेऽन्योन्याभावे चाधिकरणत्वेन वृक्षोऽन्वेति तथा च वृक्षवृत्तिविभागजनकवृक्षत्ववदन्योन्याभावप्रतियोगि
तावच्छेदकपतनाश्रयः पर्णमिति वाक्यार्थः तथा च ध्रुवमपायेऽपादानमिति पाणिनिसूत्रम् अपाये विभागे
ध्रुवे निश्चले प्रकृतपञ्चम्यर्थविभागजनकत्वावधिक्रियाशून्यमिति तदर्थः धावतोऽश्वात् पततीत्यादावश्वा
देस्तद्विभागहेतुक्रियावत्त्वेऽपि प्रकृतपञ्चम्यर्थविभागजनकत्वावधि नीयापतनक्रियाशून्यत्वमश्वा
देर्नैसत्त्वम् अस्य विभागाश्रयत्वेन वृक्षादेरपादानत्वे वृक्षात् पर्णं स्पन्दत इत्यपि स्यात् अतः क्रियेति क्रियापदं सक
र्मकधात्वर्थपरम् व्याघ्राद्बिभेतीत्यादौ तु पञ्चमी नापादाने किन्तु हेतुत्वे इत्यग्रे वक्ष्यामि धात्वर्थतानवच्छे
दकत्वेन विभागो विशेष्यः तेन वृक्षात् पतज्जातिः खग इत्यादौ वृक्षादेर्नापादानत्वम् यद्वा विभागावच्छिन्नक्रियायाश्र
यत्वं तथा विभागो विभागविशिष्टक्रियाजन्यत्वाभावान्न दोष इति मन्त्र तदर्थः संयोगावच्छिन्नक्रियायाः
पतत्यर्थे तथा हि वृक्षात्पर्णं विभागेऽयः संयोगविशिष्टक्रियायाग्रजनकत्वादसम्भवापत्तेः विभागफलोपलक्षि
तव्यापारजन्यत्वे तु भवत्येवेत्याहुरिति दिक् वृक्षाद्विभजते इत्यादौ विभागावधित्वमपादानत्वम् अवधित्वञ्च
रूपसम्बन्धिरूपं पञ्चम्यर्थः अपाये विभागे ध्रुवमवधिभूतमपादानमित्यपि पाणिनिसूत्रार्थः तथा च वृ
क्षनिष्ठावधितानिरूपकविभागाश्रयः पर्णमिति वाक्यार्थः नचैवं वृक्षस्माद्विभजते इत्यपि स्यात् स्वप्र

का॰ का॰
२

तियोगित्वविशिष्टसंयोगस्यैव स्वावधिकत्वविशिष्टविभागस्यापि तस्मिन्नभावात् इत्थं चापादानपदं प
ना ञ्चमीनार्थमेव बोध्यम् धावतोऽश्वात्पततीत्यादावपि अवधित्वमेव पञ्चम्यर्थः व्याघ्राद्बिभेति शत्रोः परित्राय
१ त इत्यादौ पञ्चमी नापादाने किन्तु भीत्रार्थानां भयहेतुरिति सूत्रेणानुशिष्टहेतुत्वार्थिका धातोश्च यथाय
थं भयं भयाभावश्चार्थः पञ्चम्यर्थो हेतुत्वं धात्वर्थे भये धात्वर्थतावच्छेदके च भय एवेति आश्रयत्वं व्यापारस्य
यद्यपि यथासंख्यं नार्थः तथा च व्याघ्रहेतुकभयाश्रय इत्याद्यः शत्रुहेतुकभयाभावानुकूलव्यापारवा
नित्यस्यार्थः इत्थं च हेतुपञ्चम्येवोपपन्ने पृथक्सूत्रं पञ्चम्यर्थमिति बोध्यम् एवं कूपादन्धं वारयतीत्यादौ पञ्च
म्या अवधित्वमर्थः संयोगानुकूलक्रियारूपं पतनं द्वितीयायाः धात्वर्थः प्रतिबन्धानुकूलव्यापारः तथा च कू
पावधिकाधःपतनरूपपतनप्रतिबन्धानुकूलव्यापारानुकूलकृतिमानिति वाक्यार्थः सम्पद्यते स च न युक्तः
यत्र द्वित्रिक्षणावस्थायिनि वेगरूपे परमाण्वादेरधःसंयोगोऽपि मानाभावेनास्ति इत्यत्रासम्भवात् अतएव
द्वितीयायाः पतनं पञ्चम्या धात्वर्थतावच्छेदकाभावान्वयित्वमिति तं धातोरभावानुकूलव्यापारः तथा च
कूपद्वृत्यन्धपतनाभावानुकूलव्यापारविषयककृतिमानिति वाक्यार्थोऽपि न युक्तः यदन्धस्य पतनमप्रसिद्ध
मत्रासम्भवात् किन्तु धातोरभावानुकूलव्यापारः पञ्चम्या वृत्तित्वं द्वितीयायाः प्रतियोगित्वं धात्वर्थतावच्छेद
इति वृत्ति कीभूताभावान्वितमर्थः अभावश्च कूपादिसमभिव्याहारात् पतनादिना तेनाधःसंयोगादिना वा सम्बन्धे पतन=
योगित्वं च= न बोध्यः तथा च पतनादिसम्बन्धेन कूपद्वृत्यन्धप्रतियोगिकाभावानुकूलव्यापारविषयककृतिमानिति
वाक्यार्थः एवमेतस्मात्स्वविषादन्नान्मित्रं वारयतीत्यादौ यत्स्वविषान्नस्य यन्मित्रस्य च भोजनमप्रसिद्धं तया
पि भोजनादिसम्बन्धेन स्वविषान्नवृत्तिमित्रप्रतियोगिकाभावानुकूलव्यापारविषयककृतिमानित्यन्वयधीः
परे तु कूपादन्धं वारयतीत्यत्र स्वविषादन्नान्मित्रं वारयतीत्यत्र धातोः पतनमाद्ये अन्ते किन्तु पञ्चम्याः धातोर्द्वि
तीये भोजनं न भावानुकूलव्यापारश्चोभयत्र पञ्चम्याः कर्मत्वमुभयत्र द्वितीयार्थः कर्तृत्वमर्थः धात्वर्थता ः द्वित्वं चार्थः
वच्छेदकीभूताभावे धात्वर्थे पतनादेरधिकरणत्वे द्वितीयार्थ किन्तु पञ्चम्यर्थावच्छिन्नादि द्वितीयार्थकर्तृत्वा

आद्ये द्वितीये च अन्वयः=१ आद्ये द्वितीये च पञ्च कर्मत्वं=१ उभयत्र=२
धातोरर्थः म्यर्थः

यद्यपि लौकिकचाक्षुषप्रत्यक्षे घटादौ चेतनत्तिरूपितत्वं नास्ति आकाशविषयित्वं च नास्ति द्विवावच्छिन्नमाकाशविषयित्वे घटादिवृत्तित्वे चवि
शेषणं व्यर्थं तथापि चैत्रेण पश्यमानेकौ त्यादौ लौकिकचाक्षुषप्रत्यक्षे आकाशविषयित्वं नास्ति चैत्रवृत्तित्वं चास्ति तत्र द्विविधितावच्छिन्नमाकाशविषयि

भयस्य प्रतियोगित्वेनान्वयोऽनुपपत्तिर्वैविध्यात् एवं च पतनाधिकरणकरूपावच्छिन्नत्वान्धकत्वेकत्वो। तैवैत्रवृत्तित्वं
भयप्रतियोगिकाभावानुकूलव्यापारविषयकयत्नत्वानित्याद्यस्य भोजनसामान्यसहितविषयकमेकत्वमित्र नास्ति एतस्य
कर्त्रत्वोभयप्रतियोगिकाभावानुकूलव्यापारविषयकयत्नत्वानित्ति द्वितीयस्यार्थः आकाशं न पश्यति इ चेपि द्वयं नास्ती
त्यादौ द्वितीयाया विषयित्वम् लक्षणया घटादिवृत्तित्वविशिष्टं च बोध्यते धात्वर्थालौकिकविषयित्वावच्छि तिप्रतीते
न्नचाक्षुषप्रत्यक्षम् तत्रैवविशिष्टावच्छिन्नद्वितीयार्थान्वितमन्वयस्यान्वयः आत्मात्ममनात्मभयाभावान्वि
तत्निरूपकत्वमर्थः तथा च लौकिकचाक्षुषप्रत्यक्षसामान्ये आकाशविषयित्वघटादिवृत्तित्वोभयाभा
वत्त्वन्निरूपकोवद्र इत्यर्थः आकाशादिविषयकचाक्षुषोपनीतभानेपि लौकिकविषयतावच्छेदेनाकाश
सत्वा विषयत्वचैत्रवृत्तित्वोभयाभावो न दोषः एवमन्यत्रापि सिद्धस्थले बोध्यमित्यलं हिमवतो गंगा प्रभवतीत्या
दौ पञ्चम्या देशत्वं धात्वर्थमात्रिरयर इतिलक्षणम् तदीज्ञानिकत्वे एवापञ्चम्याः प्रभवतीति पञ्चमी सम्बन्धार्थः
प्रसङ्गात् किंत्वधरुप्रेणभवनप्रभवनंप्रकाशः आद्यवृत्तिः संयोगरूपः सम्बन्धोर्थः वृत्तिः पदार्थः अन्वो पञ्चम्यर्थः
तेभूत्वेत्पञ्चम्यर्थः तद्योगध्वंसाव्यवहितोत्तरत्तणा[illegible]सीसयोगः इतिलमाख्यातार्थ आ
श्रयत्वम् तथा च हिमालयसंयोगध्वंसाव्यवहितोत्तरत्तणवृत्त्याद्यपृथिवीसंयोगाश्रयत्ववती गङ्गेत्यर्थः वै
कुण्ठात् काशीतोवा गङ्गा प्रभवतीत्यप्रयोगादव्यवहितेत्याद्युक्तिः च वैकुण्ठसंयोगध्वंसाव्यवहितोत्तरत्त
णस्य च्यवनस्य काशीसंयोगध्वंसाव्यवहितोत्तरत्तणो[illegible]तस्याभावाददोषः वल्मीकाग्रात्प्रभवति धनुः
खण्डमित्येतत्स्यादौ अपादानमेव वत्त्वतिः पदार्थो वल्मीकाग्रे देश इति विशेषः कृष्णात्पराजयते
शिशुपालः अध्ययनात्पराजयते बाल इत्यादौ धातोरसहिष्णुतापञ्चम्याः कर्मत्वमाख्यातस्याश्रयत्वम
र्थः श्रीकृष्णं न सहते अध्ययनं न सहत इति विवरणात्सहिष्णुताद्वेषः अभिभवाशक्तत्वज्ञानमशक्त
त्वज्ञानं वा तथा च श्रीकृष्णविषयकाभिभवाशक्तत्वज्ञानवान् शिशुपालः कृष्णविषयकद्वेषवानित्यादि

का.वा. स्य अप्रधानविषयकाप्रकारत्वज्ञानं वान्वालइत्यनन्तस्यार्थः विप्राद्धनमादत्ते चौर इत्यादौ पञ्चम्या षष्ठ्या वि ५०
१० नियोगार्थो न तु स्वत्वम् चौराद्धनमादत्ते इत्यादौ चौरस्य स्वत्वाभावेन तदसम्भवात् धातोरपि षष्ठ्येष्टविनियोग
10 फलकस्वीकारोर्थः न तु स्वत्वजनकस्वीकारः विप्राद्धनमादत्ते चौर इत्यादौ तदसम्भवात् पंचम्यर्थश्च विनियो
गः अव्यवहितोत्तरत्वसम्बन्धेन धात्वर्थतावच्छेदके विनियोगे वेति अव्यवहितोत्तरत्वं च स्वसमानविषयकत्वा अव्यवहितोत्त रविनियोगः ५
न्तरीयविनियोगाव्यवहितत्वमित्र्व तेन शूद्रतः प्रतिगृहीताद्विप्रेण दत्तं धनमादाने रिक्थद्दादादत्त इति न प्रयो।
गः इत्थं च विप्रषष्ठ्येष्टविनियोगाव्यवहितोत्तरधनवृत्तिषष्ठ्येष्टविनियोगफलकस्वीकारवानित्यर्थः अधा
र्माज्जुगुप्सते इत्यत्र पञ्चम्यर्थः कर्मत्वं धातोर्निन्दार्थः तथा चाधर्मं निन्दतीत्यर्थः अधर्माद्विरमत इति धातोः क
रणानन्तरमकरणमर्थः पञ्चम्याः कर्मत्वमर्थः स च करणेऽकरणे वान्वेति तथा चाधर्मं कृत्वा पुनर्न करो
तीत्यर्थः धर्मात्प्रमाद्यतीत्यादौ पञ्चम्या विषयत्वं धातोरनवधानत्वमाख्यातस्याश्रयत्वमर्थः धर्मविषय
कानवधानाभावाश्रय इति वाक्यार्थः उपाध्यायादन्तर्धत्ते शिष्य इत्यादौ धातोः स्वविषयकप्रत्यक्षविरोधिव्यापा
रः पञ्चम्याः सम्बन्धित्वं धात्वर्थतावच्छेदकप्रत्यक्षेऽन्वेत्याख्यातस्य कृतिरर्थः तथा चोपाध्यायसम्बन्धिक
स्वविषयकप्रत्यक्षविरोधिव्यापारानुकूलकृतिमानिति वाक्यार्थः इत्थाद्रूढः ध्रुमाहाङ्किमानित्यादौ पञ्चमी
नापादाने क्रियायोगाभावात् किं तु जनकत्वज्ञापकत्वरूपेण ते जन्यत्वव्याप्यत्वरूपेण मत्वेवादेतावितिसू
त्रेणानुशिष्टा न चैवं जनिकर्तुः प्रकृतिरिति सूत्रवैयर्थ्यम् कामाच्चतीमत्रैव दुःखाज्जायत इत्यादावपुन्नत्तिनि
रूपितहेतुतारूपिकपञ्चम्या हेतावितिसूत्रेणैव सम्भवादिति वाच्यम् उत्पत्तेः सहेतुत्वेऽपि सावधिकव्यवहाराद्युप
त्तिरूपधात्वर्थनिरूपितस्वरूपसम्बन्धरूपतस्याहेतुत्वानात्मकत्वादेतावितिसूत्रेणातदर्थकपञ्चम्या असम्भवा
दिति अधिकरणत्वं च न सम्बन्धः संयोगादिरूपसम्बन्धस्य हि निष्पद्यावस्थादेरपि कुण्डाद्याधारतापत्तेः न च
स्वधर्मसम्बन्धोऽधिकरणत्वं ऊखादिकं च न वस्तादिधर्म इति वाच्यम् स्वधर्मत्वस्य साधयत्व रूपतया धेयत्व। १०

स्वशब्देन कृ ए
नहि मौ बदरं बरव
कुएमिति प्रतीतेः
न तोष धोधि तारस्य
तस्याबेन नब दर्व

सच स्वनिष्ठाधिकरणतानिरूपकत्वरूपत्वेनान्योन्याश्रयप्रसङ्गात् नाप्युक्तत्वे स्थितत्वे रेणुसंयोगे वायोर्व्वाणी
यमधिकरणत्वम् अतएव वृक्षे वानरसंयोगकाले समवायाधिकरणम् स्थितत्वेऽपि वृक्षे भूतलादिसंयोगाभावात् सा
मवायी समवायादेः स्वरूपसम्बन्धमिवाश्रयम् अपेक्षणीयसकारणत्वापत्तेः असमवायिकारणतावति व्या
प्तेः समवायि[illegible]कारणत्वस्य देशे मेघादिसंयोगस्य सम्भवति नापि तद्भिन्नत्वे तद्वृत्तित्वप्रतिबन्धकसंयोगवत्त्वं तत्
त्वमधिकरणत्वम् भूतलादिधारकसंयोगाश्रये [illegible]वारणाय भूतलत्वरूपात्त मूर्त्तमात्रस्य विलक्षणत्वं तथा
गादिमत्त्वेन अतएव पङ्कजकोशकान्तरात्मविनष्टभ्रमरस्याधिकरणत्वेन नाप्रसिद्धावपि नाव्याप्तिः श्येण
देशत्वसमवायित्वसमवायादेस्तत्स्वरूपसम्बन्धित्वं वाच्यम् अननुगमात् सम्बन्धानानात्वेनान्याय्यत्वात् किं
त्वप्रतियोगितादिवदधिकरणत्वमधिकरणमधिकरणमिति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः सचाति
रिक्तोनतिरिक्तो वेत्यन्यदेतत् एवमाधेयत्वमपि कुण्डे बदरं स्थाल्यामोदनं पचतीत्यादौ पञ्चम्यर्थः संतापनम
धोवह्निसंयोगानुकूलकालएवस्थालीव्यापारस्तथैव पञ्चम्यर्थो विक्लित्त्यवच्छिन्नाधिकरणत्वं तादृशसंयोगएव पा
कजनकमित्यादिव्यवहारादिति अथ यथापि गेहादेः साक्षादधिकरणत्वाभावात्कर्त्तृकर्मान्यतरद्वारा
क्रियाश्रयत्वरूपाधिकरणत्वसम्बन्धः तद्वाक्यः कर्त्तृकर्म्मव्यवहितमसाक्षाद्धारयत्क्रियाम् उपकुर्वत्क्रिया
सिद्धौ शास्त्रेऽधिकरणसंज्ञतम् वस्तुतः परम्परया क्रियाश्रयत्वसम्बन्धः अतएव प्राङ्गणे स्थितन्दीर्घादा
दिनाकाष्ठादिचालनद्वारा गृहमध्ये पाककरणे गृहस्य कर्त्तृद्वारा क्रियानाश्रयत्वेऽपि गृहे पचतीति प्रयोगः
वह्निचैत्रादेः साक्षात्क्रमगमनादिक्रियाश्रयत्वेऽपि वह्नौ पचतीति चैत्रे गच्छतीत्यादि प्रयोगात्पर्यवसन्नम
नचैवं क्रियाश्रयत्वसैवसम्बन्धार्थे क्रियायोगं विना भूतले घट इत्यादिप्रयोगो न स्यादिति वाच्यम् इष्टत्वात्
नहि क्रियारहितं वाक्यमस्तीति शाब्दिकाः वस्तुतोऽधिकरणत्वमात्रमाधेयत्वमात्रं वा सम्बन्धार्थः क्रियाशून्य
मलक्षणात् नचयत्क्रियायामन्वेति तत्कारकत्वव्यवहारः अतएव भूतले घट इति क्रियाशून्यवाक्यात्तु

//

सीम्नि विषयक स्वत्वप्रकारकेच्छाविषयं यावन्निष्ठकृतिजन्यव्यापार
जन्यप्राणवियोगाश्रयः पुष्कलक इत्यन्वयबोधः सीम्नि पुष्कलको हन्ती

कार्वा: त्ववबोध इति नैयायिकाः अत्र भूतलनिष्ठाधिकरणतानिरूपकोऽवच्छेदकत्वबोधः निरूपत्वे निरूपकत्वं च संसर्ग इ
ति प्राञ्चः एवं च तन्निरूपकत्वसम्बन्धस्य प्रतियोगितानवच्छेदकत्वाद् भूतलेन घट इत्यादौ नान्वयो न च यासम्भवो
ऽन्वयाधेयत्वे सममर्थः तत्र वस्तुत्वार्थस्य निरूपकतया प्रथमान्तस्याधिकरणतया चान्वये भूतलनिरूपिताधे
यताश्रयो घट इत्यन्वयबोधः निरूपितत्वमाश्रयत्वं च संसर्ग इति नव्याः चर्मणि द्वीपिनं हन्तीत्यादौ सप्तम्यर्थो
निमित्तत्वं तच्चोद्देश्यत्वं फलत्वेन फलवत्त्वेन चेच्छाविषयत्वात् एवं मत्कुणमशकनिवृत्तौ धूमं करोतीत्यादौ मशक
निवृत्तेः फलत्वात् चर्मणि द्वीपिनं हन्तीत्यादौ चर्मादेः सिद्धतया स्वत्वरूपफलवत्त्वेनैवेच्छाविषयत्वात् तत्र प्रयोज
कत्वेन धात्वर्थेऽन्वेति मशकनिवृत्तिविषयकेच्छाप्रयोज्यधूमकरणाश्रयः चर्मविषयकस्वत्वप्रकारकेच्छाप्रयोज्यद्वी
पिकर्मकहननानुकूलकृतिमानिति वाक्यार्थः एवं सीम्नि पुष्कलको हत इत्यादावपि पुष्कलको गन्धमृग इति को
शात् स च निमित्तात्कर्मयोग इत्यनुशासनात् किंचित्कर्मप्रकारकबोधजनकधातुयोगे प्रयुज्यत इति तादृशबो
धजनकत्वात्मककर्मकस्य धातोः कर्मबोधकपदयोगेन यथा चर्मणि द्वीपिनं हन्तीत्यादौ सकर्मकस्य कर्मविशि
ष्टार्थबोधकत्वात् अविद्याविजनीतन्ये यष्टी नीत्यादौ इष्टेनीत्यादौ दिवमारोहतीत्यादौ तत्र जनीतन्य
स्य योग्यत्वं जन्यत्वे विनिमित्तत्वं ज्ञानविषयत्वे ... तथा लोकानां रञ्जने तद्यज्ञानार्थं सदेतीत्यादौ इत्यनेक ए
तत्वदीपवृत्तियावदृश्यसंसर्गाभावविशिष्टस्यकालस्य जनितत्वात् स्योदये तद्दृश्यत्वादेनैतत्प्रमाभावात् नाशेति
शिष्टकालनाशाद् जनितत्वे च्छाप्रयोज्य संयोद्येन तद्दृश्यमित्यन्ये शरदि पुष्प्यन्ति सप्तच्छदा इत्यत्रोक्तनिरूपित
सममर्थः शरदृश्यत्तिकपुष्पाश्रयाः सप्तच्छदा इति वाक्यार्थः न च शरदृश्यत्तिकपुष्पाश्रये चम्पकादावपि प्रयोगाप
त्तिः स्यादिति वाच्यम् सप्तच्छदपुष्पाश्रयत्वं लक्षणस्येति विशेष्यतया पुष्पेऽपि सप्तच्छदवृत्तित्वलाभात् तदवच्छेदेन
शरदृश्यत्तिसिद्धत्वात् चम्पकादिपुष्पत्वावच्छेदेन शरदृश्यत्तिकत्वाभावेन तथा प्रयोगाभावात् धातोरेव सप्तच्छ
दीयपुष्पत्वे लक्षणेति केचित् सति सप्तम्याः सामानाधिकरण्यमर्थः गुणकर्मान्यत्वे सति सत्त्वादित्यत्रोक्तप

(left margin notes:)
अन्तत्वे ... आधेयत्वाव ... निरूपकत्वाव ... किन्नु प्रतियोगिता कोऽवच्छेदकाभाव इति बोध ...
प्राणवियोगा नुकूलो व्यापारः =
कर्मप्रकारकबोधजनकता

(right margin notes:)
सीम्नि चर्मणि द्वीपिनं हन्ती निद ...
कर्मप्रकारक ...
न ...
राम: ११

12

का॰वा॰ १२

वर्तमानध्वंसप्रतियोगित्वं यस्मिन्निति तत्त्वम् वर्तमानध्वंसप्रतियोगिगोदोहनं गोदोहनविशेषणं प्रतियोगित्वं प्रतियोगित्वविशेषणं वर्तमानध्वंसः = ८ वर्तमानप्रागभावप्रतियोगित्वमविशिष्टम् प्रतियोगित्वविशेषणवर्तमानप्रागभावः = ९ गोदोहनं विशेषणप्रतियोगित्व

कर्मान्वयसमानाधिकरणसत्वबोधनात् न च कथं कालिकं कथं चिदैशिकं तत्रापि समानकालीनत्वप्र-
र्थवसत्वम् यथा गोषु दुह्यमानासु आगतः अत्र सप्तम्यर्थसमानकालीनत्वे दोहनमात्रस्य न निरूपकत्वेना-
न्वयः मदिष्यादि दोहनकालीनेन्यप्रयोगाभावात् नापि गोदोहनस्य गोदोहनत्वेन धात्वर्थतया उपस्थितेः
किं तु दण्डी पुरुषो भाति इत्यत्र यथा परंपरया पुरुषविशेषणतापन्नदण्डे समानकालीनत्वमागमने भासते त-
था गोविशेषणकर्मताविशेषणतापन्नस्य दोहनस्य इत्थं च तादृशा गोदोहनसमानकालीनताग-
मनानुकूलकृतिमानिति धीः इष्यमाणागत इत्यादौ तु न तथान्वयः आगमनकाले गोदोहनस्यातीतत्वे नागतो दो-
हनकालीनत्वस्यागमने बाधात् किं तु वर्तमानध्वंसप्रतियोगि दोहनकर्मत्व गोष्वित्यर्थात् अतीतार्थे तादृ-
शगोदोहनविशेषणप्रतियोगित्वविशेषणतापन्नस्य समानकालीनत्वमागमने भासते तथा च तादृशव-
र्तमानध्वंसकालीनागमनानुकूलकृतिमानित्यन्वयबोधः एवं गोषु दोग्ध्यमानासु आगत इत्यादावपि ता-
दृशप्रतियोगित्वविशेषणप्रागभावस्य समानकालीनत्वं भासते न च सप्तम्यर्थसमानकालीनत्वे प्रकृता-
र्थस्य गोदोहनस्यानन्वयापत्तिः नाहम्यादोहनकर्मत्वविशिष्टगोत्वविशेषणकर्मत्वविशेषणदोहना-
द्यनुयोगसम्बन्धेन कालेऽन्वयात् इत्यलं बोध्यम् यस्य च भावेन भावलक्षणमिति सूत्रस्य क्रियया
क्रियान्तरलक्ष्यते इति व्याख्यानात् क्रिययोः सामानाधिकरण्ये सप्तमीत्यन्ये तेषां शेषेति शर्मणः कर्मा-
न्तरे सति सत्त्वादित्यादौ नस्यात् तत्र गुणकर्मान्यत्वे सति सत्तावत्त्वमिति प्रयोगदर्शनात् तत्र तद्व्या-
नयाभावक्रियापदे धर्मपरे तथा च यस्य च धर्मेण धर्मान्तरनिरूपणं समानाधिकरण्येन प्रतिपाद्यते त-
त्र सप्तमीति सूत्रार्थ इत्यदोषः इति श्रीमन्महोपाध्यायश्रीजयरामकृतः कारकवादः ॥ शुभम-
द्वाणवेदद्वयब्दमिते हि विक्रमाङ्के सहस्यकसितैकादश्यां चिचित्तिजीवनाभिधा तार्किकाणां मतिम-
तां मतिजनकायमाः सुवादः कारकाणां स्वाध्ययनाय परस्य च ॥ १२

विभागाव्यक्ति क्रियापदेन क्रिया दोहनम् दोहनविशेषणप्रतियोगि क्रिया क्रियाविशेषणविभागः विभाग विशेषणम्

गोदोहनविशेषणप्रतियोगि गोविशेषणम् गोदोहनविशेषणप्रतियोगित्वविशेषणम् वर्तमानप्रागभावप्रतियोगित्व

गोषु दुह्यमानास्वागत इत्यत्र गोदोहनविशेषणप्रतियोगित्वविशेषणवर्तमानप्रागभावसमानकालीनत्व ... बोधः = ९

पत्र ९२